# નારદાય શૌનકકૃતવિષ્ણુસ્તુતિઃ

nAradAya shaunakakRitaviShNustutiH

sanskritdocuments.org

October 6, 2018

nAradAya shaunakakRitaviShNustutiH

# નારદાય શૌનકકૃતવિષ્ણુસ્તુતિઃ

## Sanskrit Document Information

Text title : viShNustuti by nArada and shaunaka from nAradapurANa

File name : viShNustutinAradakRitanAradapurANa.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Source : Naradapurana Purvabhag Adhyaya 2

Latest update : January 4, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 6, 2018

*sanskritdocuments.org*

# નારદાય શૌનકકૃતવિષ્ણુસ્તુતિઃ

ઋષય ઊચુઃ ॥

કથં સનત્કુમારસ્તુ નારદાય મહાત્મને ।
પ્રોક્તવાન્સકલાન્ધર્માન્કથં તૌ મિલિતાવુભૌ ॥ ૧॥

કસ્મિન્સ્થાને સ્થિતૌ સૂત તાવુભૌ બ્રહ્મવાદિનૌ ।
હરિગીતસમુદ્ગાને ચક્રતુસ્તદ્વદસ્વ નઃ ॥ ૨॥

સૂત ઉવાચ ॥

સનકાદ્યા મહાત્માનો બ્રહ્મણો માનસાઃ સુતાઃ ।
નિર્મમા નિરહઙ્કારાઃ સર્વે તે હ્યૂર્ધ્વરેતસઃ ॥ ૩॥

તેષાં નામાનિ વક્ષ્યામિ સનકશ્ચ સનન્દનઃ ।
સનત્કુમારશ્ચ વિભુઃ સનાતન ઇતિ સ્મૃતાઃ ॥ ૪॥

વિષ્ણુભક્તા મહાત્માનો બ્રહ્મધ્યાનપરાયણાઃ ।
સહસ્રસૂર્યસઙ્કાશાઃ સત્યસન્ધા મુમુક્ષવઃ ॥ ૫॥

એકદા મેરુશૃઙ્ગં તે પ્રસ્થિતા બ્રહ્મણઃ સભામ્ ।
ઇષ્ટાં માર્ગેઽથ દદૃશુઃ ગઙ્ગાં વિષ્ણુપદીં દ્વિજાઃ ॥ ૬॥

તાં નિરીક્ષ્ય સમુદ્યુક્તાઃ સ્નાતું સીતાજલેઽભવન્ ।
એતસ્મિન્નન્તરે તત્ર દેવર્ષિર્નારદો મુનિઃ ॥ ૭॥

આજગામ દ્વિજશ્રેષ્ઠા દૃષ્ટ્વા ભ્રાતૄન્સ્વકાગ્રજાન્ ।
તાન્દૃષ્ટ્વા સ્નાતુમુદ્યુક્તાન્નમસ્કૃત્ય કૃતાઞ્જિલિઃ ॥ ૮॥

ગુણન્નામાનિ સપ્રેમભક્તિયુક્તો મધુદ્વિષઃ ।
નારાયણાચ્યુતાનન્ત વાસુદેવ જનાર્દન ॥ ૯॥

યજ્ઞેશ યજ્ઞપુરુષ કૃષ્ણ વિષ્ણો નમોઽસ્તુ તે ॥

પદ્માક્ષ કમલાકાન્ત ગઙ્ગાજનક કેશવ ।
ક્ષિરોદશાયિન્દેવેશ દામોદર નમોઽસ્તુ તે ॥ ૧૦॥

શ્રીરામ વિષ્ણો નરસિંહ વામન પ્રદ્યુમ્નસઙ્કર્ષણ વાસુદેવ ।
અજાનિરુદ્ધામલરુઙ્મુરારે ત્વં પાહિ નઃ સર્વભયાદજસ્રમ્ ॥ ૧૧॥

ઇત્યુચ્ચરન્હરેર્નામ નત્વા તાન્સ્વાગ્રજાન્મુનીન્ ।
ઉપાસીનશ્ચ તૈઃ સાર્દ્ધં સસ્નૌ પ્રીતિસમન્વિતઃ ॥ ૧૨॥

તેષાં ચાપિ તુ સીતાયા જલે લોકમલાપહે ।
સ્નાત્વા સન્તર્પ્ય દેવર્ષિપિતૃન્વિગતકલ્મષાઃ ॥ ૧૩॥

ઉત્તીર્ય્ય સન્ધ્યોપાસ્યાદિ કૃત્વાઽઽચારં સ્વકં દ્વિજાઃ ।
કથાં પ્રચક્રુર્વિવિધાઃ નારાયણગુણાશ્રિતાઃ ॥ ૧૪॥

કૃતક્રિયેષુ મુનિષુ ગઙ્ગાતીરે મનોરમે ।
ચકાર નારદઃ પ્રશ્નં નાનાખ્યાનકથાન્તરે । ૧૫॥

નારદ ઉવાચ ।
સર્વજ્ઞાઃ સ્થ મુનિશ્રેષ્ઠાઃ ભગવદ્ભક્તિતત્પરાઃ ।
યૂયં સર્વે જગન્નાથા ભગવન્તઃ સનાતનાઃ ॥ ૧૬॥

લોકોદ્ધારપરાન્યુષ્માન્દીનેષુ કૃતસૌહૃદાન્ ।
પૃચ્છે તતો વદત મે ભગવલ્લક્ષણં બુધાઃ ॥ ૧૭॥

યેનેદમખિલં જાતં જગત્સ્થાવરજઙ્ગમમ્ ।
ગઙ્ગાપાદોદકં યસ્ય સ કથં જ્ઞાયતે હરિઃ ॥ ૧૮॥

કથં ચ ત્રિવિધં કર્મ સફલં જાયતે નૃણામ્ ।
જ્ઞાનસ્ય લક્ષણં બ્રૂત તપસશ્ચાપિ માનદાઃ ॥ ૧૯॥

અતિથેઃ પૂજનં વાપિ યેન વિષ્ણુઃ પ્રસીદતિ ॥

એવમાદીનિ ગુહ્યાનિ હરિતુષ્ટિકરાણિ ચ ।
અનુગૃહ્ય ચ માં નાથાસ્તત્ત્વતો વક્તુમર્હથ ॥ ૨૦॥

શૌનક ઉવાચ ॥

નમઃ પરાય દેવાય પરસ્માત્પરમાય ચ ।
પરાવરનિવાસાય સગુણાયાગુણાય ચ ॥ ૨૧॥

અમાયાયાઽઽત્મસંજ્ઞાય માયિને વિશ્વરૂપિણે ।
યોગીશ્વરાય યોગાય યોગગમ્યાય વિષ્ણવે ॥ ૨૨॥

જ્ઞાનાય જ્ઞાનગમ્યાય સર્વજ્ઞાનૈકહેતવે ।
જ્ઞાનેશ્વરાય જ્ઞેયાય જ્ઞાત્રે વિજ્ઞાનસમ્પદે ॥ ૨૩॥

ધ્યાનાય ધ્યાનગમ્યાય ધ્યાતૃપાપહરાય ચ ।
ધ્યાનેશ્વરાય સુધિયે ધ્યેયધ્યાતૃસ્વરૂપિણે ॥ ૨૪॥

આદિત્યચન્દ્રાગ્નિવિધાતૃદેવાઃ સિદ્ધાશ્ચ યક્ષાસુરનાગસઙ્ઘાઃ ।
યચ્છક્તિયુક્તાસ્તમજં પુરાણં સત્યં સ્તુતીશં સતતં નતોઽસ્મિ ॥ ૨૫॥

યો બ્રહ્મરૂપી જગતાં વિધાતા સ એવ પાતા દ્વિજવિષ્ણુરૂપી ।
કલ્પાન્તરુદ્રાખ્યતનુઃ સ દેવઃ શેતેંઽઘ્રિપાનસ્તમજં ભજામિ ॥ ૨૬॥

યન્નામસઙ્કીર્ત્તનતો ગજેન્દ્રો ગ્રાહોગ્રબન્ધાન્મુમુચે સ દેવઃ ।
વિરાજમાનઃ સ્વપદે પરાખ્યે તં વિષ્ણુમાદ્યં શરણં પ્રપદ્યે ॥ ૨૭॥

શિવસ્વરૂપી શિવભક્તિભાજાં યો વિષ્ણુરૂપી હરિભાવિતાનામ્ ।
સઙ્કલ્પપૂર્વાત્મકદેહહેતુસ્તમેવ નિત્યં શરણં પ્રપદ્યે ॥ ૨૮॥

યઃ કેશિહન્તા નરકાન્તકશ્ચ બાલો ભુજાગ્રેણ દધાર ગોત્રમ્ ।
દેવં ચ ભૂમારવિનોદશીલં તં વાસુદેવં સતતં નતોઽસ્મિ ॥ ૨૯॥

લેભેઽવતીર્યોગ્રનૃસિંહરૂપી યો દૈત્યવક્ષઃ કઠિનં શિલાવત્ ।
વિદાર્ય સંરક્ષિતવાન્સ્વભક્તં પ્રહ્લાદમીશં તમજં નમામિ ॥ ૩૦॥

વ્યોમાદિભિર્મૂષિતમાત્મસંજ્ઞં નિરઞ્જનં નિત્યમમેયતત્ત્વમ્ ।
જગદ્વિધાતારમકર્મકં ચ પરં પુરાણં પુરુષં નતોઽસ્મિ ॥ ૩૧॥

બ્રહ્મેન્દ્રરુદ્રાનિલવાયુમર્ત્યગન્ધર્વયક્ષાસુરદેવસઙ્ઘૈઃ ।
સ્વમૂર્તિભેદૈઃ સ્થિત એક ઈશસ્તમાદિમાત્માનમહં ભજામિ ॥ ૩૨॥

યતો ભિન્નમિદં સર્વં સમુદ્ભૂતં સ્થિતં ચ વૈ ।
યસ્મિન્નેષ્યતિ પશ્ચાચ્ચ તમસ્મિ શરણં ગતઃ ॥ ૩૩॥

યઃ સ્થિતો વિશ્વરૂપેણ સઙ્ગીવાત્ર પ્રતીયતે ।
અસઙ્ગી પરિપૂર્ણશ્ચ તમસ્મિ શરણં ગતઃ ॥ ૩૪॥

હૃદિ સ્થિતોઽપિ યો દેવો માયયા મોહિતાત્મનામ્ ।
ન જ્ઞાયતે પરઃ શુદ્ધસ્તમસ્મિ શરણં ગતઃ ॥ ૩૫॥

સર્વસંગનિવૃત્તાનાં ધ્યાનયોગરતાત્મનામ્ ।
સર્વત્ર ભાતિ જ્ઞાનાત્મા તમસ્મિ શરણં ગતઃ ॥ ૩૬॥

દધાર મન્દરં પૃષ્ઠે નીરોદેઽમૃતમન્થને ।
દેવતાનાં હિતાર્થાય તં કૂર્મં શરણં ગતઃ ॥ ૩૭॥

દંષ્ટ્રાઙ્કુરેણ યોઽનન્તઃ સમુદ્ધૃત્યાર્ણવાદ્ધરામ્ ।
તસ્થાવિદં જગત્કૃત્સ્નં વારાહં તં નતોઽસ્મ્યહમ્ ॥ ૩૮॥

પ્રહ્લાદં ગોપયન્દૈત્યં શિલાતિકઠિનોરસમ્ ।
વિદાર્ય હતવાન્યો હિ તં નૃસિંહં નતોઽસ્મ્યહમ્ ॥ ૩૯॥

લબ્ધ્વા વૈરોચનેર્ભૂમિં દ્વાભ્યાં પદ્ભ્યામતીત્ય યઃ ।
આબ્રહ્મભુવનં પાદાત્સુરેભ્યસ્તં નતોઽજિતમ્ ॥ ૪૦॥

હૈહયસ્યાપરાધેન હ્યેકવિંશતિસઙ્ખ્યયા ।
ક્ષત્રિયાન્વયભેત્તા યો જામદગ્ન્યં નતોઽસ્મિ તમ્ ॥ ૪૧॥

આવિર્ભૂતશ્ચતુર્દ્ધા યઃ કપિભિઃ પરિવારિતઃ ।
ઘ્નતવાન્રાક્ષસાનીકં રામચન્દ્રં નતોઽસ્મ્યહમ્ ॥ ૪૨॥

મૂર્તિદ્વયં સમાશ્રિત્ય ભૂભારમપહૃત્ય ચ ।
સઞ્જહાર કુલં સ્વં યસ્તં શ્રીકૃષ્ણમહં ભજે ॥ ૪૩॥

ભૂમ્યાદિલોકત્રિતયં સન્તૃપ્તાત્માનમાત્મનિ ।
પશ્યન્તિ નિર્મલં શુદ્ધં તમીશાનં ભજામ્યહમ્ ॥ ૪૪॥

યુગાન્તે પાપિનોઽશુદ્ધાન્ભિત્ત્વા તીક્ષ્ણસુધારયા ।
સ્થાપયામાસ યો ધર્મં કૃતાદૌ તં નમામ્યહમ્ ॥ ૪૫॥

એવમાદીન્યનેકાનિ યસ્ય રૂપાણિ પાણ્ડવાઃ ।
ન શક્યં તેન સઙ્ખ્યાતું કોટ્યબ્દૈરપિ તં ભજે ॥ ૪૬॥

મહિમાનં તુ યન્નામ્નઃ પરં ગન્તું મુનીશ્વરાઃ ।
દેવાસુરાશ્ચ મનવઃ કથં તં ક્ષુલ્લકો ભજે ॥ ૪૭॥

યન્નામશ્રવણેનાપિ મહાપાતકિનો નરાઃ ।
પવિત્રતાં પ્રપદ્યન્તે તં કથં સ્તૌમિ ચાલ્પધીઃ ॥ ૪૮॥

યથાકથઞ્ચિદ્યન્નામ્નિ કીર્તિતે વા શ્રુતેઽપિ વા ।

પાપિનસ્તુ વિશુધ્ધાઃ સ્યુઃ શુધ્ધા મોક્ષમવાપ્નુયુઃ ॥ ૪૯॥

આત્મન્યાત્માનમાધાય યોગિનો ગતકલ્મષાઃ ।
પશ્યન્તિ યં જ્ઞાનરૂપં તમસ્મિ શરણં ગતઃ ॥ ૫૦॥

સાઙ્ખ્યાઃ સર્વેષુ પશ્યન્તિ પરિપૂર્ણાત્મકં હરિમ્ ।
તમાદિદેવમજરં જ્ઞાનરૂપં ભજામ્યહમ્ ॥ ૫૧॥

સર્વસત્ત્વમયં શાન્તં સર્વદ્રષ્ટારમીશ્વરમ્ ।
સહસ્રશીર્ષકં દેવં વન્દે ભાવાત્મકં હરિમ્ ॥ ૫૨॥

યદ્ભૂતં યચ્ચ વૈ ભાવ્યં સ્થાવરં જઙ્ગમં જગત્ ।
દશાઙ્ગુલં યોઽત્યતિષ્ઠત્તમીશમજરં ભજે ॥ ૫૩॥

અણોરણીયાંસમજં મહતશ્ચ મહત્તરમ્ ।
ગુહ્યાદ્ગુહ્યતમં દેવં પ્રણમામિ પુનઃ પુનઃ ॥ ૫૪॥

ધ્યાતઃ સ્મૃતઃ પૂજિતો વા શ્રિતઃ પ્રણમિતોઽપિ વા ।
સ્વપદં યો દદાતીશસ્તં વન્દે પુરુષોત્તમમ્ ॥ ૫૫॥

ઇતિ સ્તુવન્તં પરમં પરેશં હર્ષામ્બુસંરુદ્ધવિલોચનાસ્તે ।
મુનીશ્વરા નારદસંયુતાસ્તુ સનન્દનાદ્યાઃ પ્રમુદં પ્રજગ્મુઃ ॥ ૫૬॥

ય ઇદં પ્રાતરુત્થાય પઠેદ્વૈ પૌરુષં સ્તવમ્ ।
સર્વપાપવિશુદ્ધાત્મા વિષ્ણુલોકં સ ગચ્છતિ ॥ ૫૭॥

ઇતિ શ્રીબૃહન્નારદીયપુરાણે પૂર્વભાગે પ્રથમપાદે સનત્કુમારનારદસંવાદે
નારદાય શૌનકકૃતવિષ્ણુસ્તુતિર્નામ દ્વિતીયોધ્યાયઃ ॥ ૨॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*nAradAya shaunakakRitaviShNustutiH*

pdf was typeset on October 6, 2018

Please send corrections to *sanskrit@cheerful.com*